[1]तृन्दन्-तृन्दती, तर्दयन्-न्ती, तितर्दिषन्-तितृत्सन्-न्ती ; —
[2]तर्दिष्यन्-तर्त्स्यन्-न्ती-ती, तर्दयिष्यन्-न्ती-ती, तितर्दिषिष्यन्-तितृत्सिष्यन्-न्ती-ती ; —
तृन्दानः, तर्दयमानः, तितर्दिषमाणः-तितृत्समानः, तरीतृद्यमानः ;
तर्दिष्यमाणः-तर्त्स्यमानः, तितर्दिषिष्यमाणः-तितृत्सिष्यमाणः, तरीतृदिष्यमाणः ;
[3]वितृत्-वितृद्-वितृदौ-वितृदः ; — — —
[4]तृण्णम्-तृण्णः-तृण्णवान्, तर्दितः, तितर्दिषितः-तितृत्सितः, तरीतृदितः-तवान्;
[5]वितृदः,[A] [6]शाल्वतर्दी,[B] तर्दः, तितर्दिषुः-तितृत्सुः, तरीतृदः ;
तर्दितव्यम्, तर्दयितव्यम्, तितर्दिषितव्यम्-तितृत्सितव्यम्, तरीतृदितव्यम् ;
तर्दनीयम्, तर्दनीयम्, तितर्दिषणीयम्-तितृत्सनीयम्, तरीतृदनीयम् ;
[7]तृद्यम्, तर्द्यम्, तितर्दिष्यम्-तितृत्स्यम्, तरीतृद्यम् ;
ईषत्तर्दः-दुस्तर्दः-सुतर्दः ; — —

---

1. शतरि, 'रुधादिभ्यः—' (3-1-78) इति श्नम् विकरणप्रत्ययः। तस्य मित्त्वेन अन्त्यादचः परो भवति। श्नमः शित्त्वेन सार्वधातुकत्वादङ्गस्य गुणो न। 'श्नसोरल्लोपः' (6-4-111) इत्यकारलोपः। एवं तृन्दानः इत्यत्रापि प्रक्रिया ज्ञेया।
2. 'सेऽसिचि कृतचृतछृदतृदनृतः' (7-2-57) इति स्यप्रत्ययस्येड्विकल्पः। तेन रूपद्वयम्। इडभावपक्षे धातुदकारस्य चर्त्वेन तकारः।
3. क्विपि चर्त्वविकल्पे रूपद्वयं ज्ञेयम्।
4. धातोरस्योदित्त्वेन क्त्वायामिड्विकल्पनात्, सादेरार्धधातुकस्येड्विकल्पनाद्वा, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति इण्णिषेधः। 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8-2-42) इति निष्ठानत्वम्। पूर्वस्य नकारस्य 'ऋवर्णान्नस्य—' (वा. 8-4-1) इति णत्वम्। उत्तरस्य नकारस्य तु 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वेनेति ज्ञेयम्।
5. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कप्रत्ययः।
6. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिः।
7. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति क्यप्।

A. 'पक्षिभिर्वितृदैर्यूनां शाखिभिः कुसुमोत्किरैः।' भ. का. 6. 77.

B. 'सञ्चूर्णगात्रमथ शाल्वतर्दिनस्ते
चाणूरमुष्टिकमुखा वसनान्यकृन्तन्।' धा. का. 3. 2.